**Code No.: BFSA-02**

Total No. of Questions : 5　　　　Total No. of Printed Pages : 2

# स्नातकपरीक्षाः– २०१५

## बि.ए. – विद्वन्मध्यमा – प्रथमवर्षम्

## शास्त्रम् – अलङ्कारशास्त्रम्

### भागः – २, पत्रिका – ४

### विषयः – काव्यप्रकाशः – १

**दिनाङ्कः –** 5.4.2015　　　　**गरिष्ठाङ्काः – १००**

**समयः –** 10.00 A.M. to 1.00 P.M.　　　　Max. Marks – 100

---

**I.　एकेन वाक्येनोत्तरं लिखत।　　　　10 × 1 = 10**

१. मम्मटः ग्रन्थारम्भे कां देवतां स्तौति?

२. उत्तमकाव्यस्य ध्वनिरिति व्यवहारे केषां दर्शनं मूलम्?

३. चित्र काव्यस्य लक्षणं किम्?

४. काव्ये कतिविधः शब्दो वर्तते? ते च शब्दाः के?

५. गङ्गायां घोषः इत्यत्र लक्षणायाः कः प्रभेदः?

६. पीनो देवदत्तः दिवा न भुङ्क्ते इत्यत्र अर्थापत्तिप्रमाणेन किं ज्ञायते?

७. सशङ्खचक्रो हरिः इत्यत्र कः अभिधानियामकः?

८. रसविषये भरतमहर्षेः सूत्रं किम्?

९. अनुकार्ये यो रत्यादिः स रस इति को वदति?

१०. बीभत्सरसे स्थायी भावः कः?

**II.　त्रयाणामुत्तरं लिखत।　　　　3 × 12 = 36**

१. ग्रन्थकारेण काव्यस्य लक्षणं किमुक्तम्? विशदयत।

२. लक्षणाया लक्षणमभिधाय निरूढा प्रयोजनवती चेति प्रभेदद्वयं सोदाहरणं निरूपयत।

३. शब्दार्थानवच्छेदे विशेषस्मृतिहेतवः – ते के? सोदाहरणं विवृणुत।

४. रसविषये अभिनवगुप्तस्य मतं विशदयत।

५. शब्दशक्तिमूलं वस्तुध्वनिम् अलङ्कारध्वनिं च सोदाहरणं विवृणुत।

**Code No.: BFSA-02**

**III.** श्लोकचतुष्टयं सप्रसङ्गं व्याख्याय विशेषमाविष्कुरुत। **4 × 6 = 24**

१. ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।
पश्चन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया।।

२. मातः! गृहोपकरणमद्य खलु नास्तीति साधितं त्वया।
तद्भण किं करणीयमेवमेव न वासरः स्थायी।।

३. नुदत्यनार्द्रमनाः श्वश्रूर्मां गृहभरे सकले।
क्षणमात्रं यदि सन्ध्यायां भवति न वा भवति विश्रामः।।

४. पन्थिअ! ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे।
उण्णअपओहरं पेक्खिऊण जइ वससि ता वससु।।

५. अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा।
तारकातरला श्यामा सानन्दं न करोति कम्।।

**IV.** कारिकाद्वयं सप्रसङ्गं व्याख्यात। **2 × 5 = 10**

१. काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।

२. शक्तिर्निपुणतालोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे।।

३. यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते।
फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया।।

४. अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद् ध्वनौ।
अर्थान्तरे सङ्क्रमितमत्यन्तं वा तिरस्कृतम्।

**V.** चत्वारि वाक्यानि सप्रसङ्गं व्याख्यात। **4 × 5 = 20**

१. सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते।

२. गौः शुक्लश्चलो डित्थ इति चतुष्टयी शब्दानां प्रवृत्तिः।

३. अविनाभावोऽत्र सम्बन्धमात्रं न तु नान्तरीयकत्वम्।

४. नाभिधा समयाभात् हेत्वभावान्न लक्षणा।।

५. स च न कार्यः, विभावादिनाशेऽपि तस्य सम्भवप्रसङ्गात्।

६. निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः।

---